नं. ५११३ .

शतपथ ब्राह्मणम्

द्वय काण्डस्य कानिचित्

पत्राणि.

x x x

पत्र. ५ ——— सं. x

संहिता ब्राह्मणम्

5113

Starting from 24 to 32

1 to 23 MISSING

25, 27, 30, 31 MISSING

[illegible]

[illegible]

[illegible]

५११३



F. = 5

वर्षतुतेद्यौरितियत्रवाऽअस्यैखनंतःक्रूरीकुर्वंत्यपघ्नंतिशांतिरापस्तदद्भिःशांत्याशमयतितदद्भिःसं
दधातितस्मादाहवर्षतुतेद्यौरितिबधानदेवसवितःपरमस्यांपृथिव्यामितिदेवमेवैतत्सवितार
माहांधेतमसिबधानेतियदाहपरमस्यांपृथिव्यामितिशतेनपाशैरित्यमुवैतदाहयोस्मांद्वेष्टि
यंचवयंद्विष्मस्तमतोमामौगितियद्दिनाभिचरेद्यद्युऽअभिचरेदमुमतोमामौगितिब्रूयात्॥१८॥
अथद्वितीयंप्रहरति।अपाररुंपृथिव्यैदेवयजनाद्वध्यासमित्यररुर्हवैनामासुररक्षसमास
तंदेवाऽअस्याऽअपाघ्नंततथोऽएवैनमेतदेषोस्याऽअपहंतेव्रजंगच्छगोष्ठानंवर्षतुतेद्यौर्बधान
देवसवितःपरमस्यांपृथिव्यांशतेनपाशैर्योस्मांद्वेष्टियंचवयंद्विष्म‸मामौगिति॥१९॥ततमग्नीदभि स्तमतो२
निदधात्यरररोदिवंमापप्तऽइतियत्रवैदेवाऽअररुमसुररक्षसमपाघ्नंस्तद्दिवमपिपतिषत्तम

24

ग्निरभिन्यदधादुररोदिवंमापप्तऽइतिसनदिवमपतत्तथोऽएवैनमेतदध्वर्युर्देवास्माल्लोकादंतरेति दिवोह्य
ग्नीत्तस्मादेवंकरोति ॥१८॥ अथतृतीयंप्रहरति । द्रप्सस्ते द्यांमास्कन्नित्ययंवाऽअस्यै द्रप्सोयमस्याऽइम८र
संप्रजाऽउपजीवंत्येषते दिवंमापप्तऽइत्येवैतदाहव्रजंगच्छगोष्ठानंवर्षतुते द्यौर्बधानदेव सवितःपरम
स्यांपृथिव्या७ंशतेनपाशैर्योस्मान्द्वेष्टियंचवयंद्विष्मस्तमतोमामौगिति ॥२०॥ सवैत्रिर्यजुषाहरति । त्रयो
वाऽइमेलोकाऽएभिरेवैनमेतल्लोकैरभिनिदधात्यद्धावैतद्यदिमेलोकाऽअद्धोतद्यद्यजुस्तस्मात्त्रिर्यजुषा
हरति ॥२०॥ तूष्णींचतुर्थं ।८। सयदिमांल्लोकानतिचतुर्थमस्तिवानवातेनैवैतद्द्विषंतंभ्रातृव्यमवबाधतेऽ
द्धावैतद्यदिमांल्लोकानतिचतुर्थमस्तिवानवानद्धोतद्यत्तूष्णींतस्मात्तूष्णींचतुर्थं ॥२१॥ ब्राह्मणं ॥२॥ देवा
श्चवाऽअसुराश्च ।उभयेप्राजापत्याःपस्पृधिरेततोदेवाऽअनुव्यमिवासुरथहासुरामेनिरेऽस्माकमेवे
दंखलुभुवनमिति ॥१॥ तेहोचुः ।हंतेमांपृथिवींविभजामहैतांविभज्योपजीवामेतितामौक्ष्णैश्चर्मभिःप

शिव·
॥२४॥

मात्रानावं तमेवैतत्सरिगृह्णाति ॥१३॥ व्याममात्री पश्चात्स्यादित्याहुः । एतावान्वै पुरुषः पुरुषसंमिता
हि त्र्यरत्निः प्राचीत्रिवृद्धि यज्ञो नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यात् ॥१४॥ अभि
तोग्निमꣳसाऽउन्नयति । योषा वै वेदिर्वृषाग्निः परिगृह्य वै योषा वृषाणꣳ शेते मिथुनमेवैतत्प्रजननं क्रि
यते तस्मादभितोग्निमꣳसाऽउन्नयति ॥१५॥ सा वै पश्चाद्वरीयसी स्यात् । मध्ये सꣳह्वारिता पुनः पु
रस्तादुर्व्येव मिव हि योषां प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये संग्राह्येति जुष्टामेवैनामे
तद्देवेभ्यः करोति ॥१६॥ सा वै प्राक्प्रवणा स्यात् । प्राची हि देवानां दिगथोऽउदक्प्रवणोदीची हि म
नुष्याणां दिग्दक्षिणतः पुरीषं प्रत्युदूहत्येषा वै दिक्पितॄणाꣳ सा यद्दक्षिणाप्रवणा स्यात्क्षिप्रे
ह यजमानोमुं लोकमियात्तथोह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः पुरीषं प्रत्युदूहति पुरी
षवतीं कुर्वीत पशवो वै पुरीषं पशुमतीमेवैनामेतत्कुरुते ॥१७॥ तां प्रतिमार्ष्टि देवा ह वै संग्राम

26

ऽसंनिधास्यंतस्तेहोचुर्हंत यदस्यै पृथिव्या अनामृतं देवयजनं तच्चंद्रमसि निदधामहै स यदि न इतोऽसु
जयेयुस्तत एवार्चंतः श्राम्यंतः पुनरभिभवेमेति स यदस्यै पृथिव्या अनामृतं देवयजनमासीत्त
च्चंद्रमसि न्यदधत तदेतच्चंद्रमसि कृष्णं तस्मादाहुश्चंद्रमस्यस्यै पृथिव्यै देवयजनमित्यपि ह वा अ
स्यैतस्मिं देवयजन इष्टं भवति तस्माद्वै प्रतिमार्ष्टि ॥१८॥ स प्रतिमार्ष्टि पुरा क्रूरस्य विसृपो विर
प्शिन्निति संग्रामो वै क्रूरः संग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा ह्येतत्संग्रामान्यदधत
तस्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्निति सुदादाय पृथिवीं जीवदानुमिति सुदादाय हि पृथिव्यै यद
स्यै जीवमासीत्तच्चंद्रमसि न्यदधत तस्मादाहोदादाय पृथिवीं जीवदानुमिति यामैरयंश्चंद्रमसि
स्वधाभिरिति यां चंद्रमसि ब्रह्मणादधुरित्येवैतदाह तामु धीरासो अनुदिश्य यजंत इत्येतेनी शिवः
हतामनुदिश्य यजंतेऽपि ह वा अस्यैतस्मिं देवयजन इष्टं भवति य एवमेतद्वेद ॥१९॥ अथाहस्री ॥२६॥

सवैस्रुचः सम्मार्ष्टि तद्यत्स्रुचः सम्मार्ष्टि यथा वै देवानां चरणं तद्वा ऽ अनु मनुष्याणां तस्माद्यदा मनुष्याणां परि
वेषणमुपक्लृप्तं भवति ॥१॥ अथ पात्राणि निर्णेनिजति ते निर्णिज्य परिवेविषत्येवं वा ऽ एष देवानां यज्ञो भ
वति यच्छृतानि हवींषि क्लृप्ता वेदिस्तेषामेतान्येव पात्राणि यत्स्रुचः ॥२॥ स यत्सम्मार्ष्टि निर्णेनेक्त्येवैना ऽ ए
तन्निर्णिक्ताभिः प्रचराणीति तद्वै द्वयेनैव देवेभ्यो निर्णेनिजत्येकेन मनुष्येभ्योऽद्भिश्च ब्रह्मणा च देवेभ्य ऽ
आपो हि कुशा ब्रह्म यजुरेकेनैव मनुष्येभ्योऽद्भिरेवैवम्वेतन्नाना भवति ॥३॥ अथ स्रुवमादत्ते तं प्रतपति
प्रत्युष्टꣳ रक्षः प्रत्युष्टा ऽ अरातयः । निष्टप्तꣳ रक्षो निष्टप्ता ऽ अरातय ऽ इति वा ॥४॥ देवा ह वै यज्ञं तन्वाना
ः ते ऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षांस्यतो ऽपहन्ति ॥५॥ अर्द्धःप्र० ६१
स वा ऽ इदꣳ स्रग्ग्रैरन्तरतः सम्मार्ष्टि । अनिशितोऽसि सपत्नक्षिदिति यथानुपरतो यजमानस्य सपत्नान्क्षिणु
यादेवमेतदाह वाजिनं त्वा वाजेध्यायै सम्मार्ज्मीति यज्ञियं त्वा यज्ञाय सम्मार्ज्मीत्येवैतदाहैतेनैव सर्वाः

28

स्रुचःसम्मार्ष्टिवाजिनींत्वेतिस्रुचंतूष्णींप्राशित्रहरणं॥६॥सवाऽइत्यग्रैरंतरतःसम्मार्ष्टीति।मूलैर्बाह्यतऽइती
ववाऽअयंप्राणऽइतीवोदानःप्राणोदानावेवैतद्दधातितस्मादितीवेमानिलोमानीतीवेमानि॥७॥सवै
सम्मृज्यसम्मृज्यप्रतप्यप्रतप्यप्रयच्छति।यथावमर्शंनिर्णिज्यानवमर्शमुत्तमंपरिक्षालयेदेवंतत्तस्मात्प्र
तप्यप्रतप्यप्रयच्छति॥८॥सवैस्रुवमेवाग्रेसम्मार्ष्टि।अथेतराःस्रुचोयोषावैस्रुग्वृषास्रुवस्तस्माद्यद्यपिब
ह्व्यऽइवस्त्रियःसार्द्धंयंतियऽएवतास्वपिकुमारकऽइवपुमान्भवतिसऽएवतत्रप्रथमऽएत्यनूच्यऽइतरा
तत्तस्मादुर स्तस्मात्स्रुवमेवाग्रेसम्मार्ष्ट्यथेतराःस्रुचः॥९॥सवैतथैवसंमृज्याद्यथाग्निनाभिव्युक्षेद्यथायस्माऽ
अशनमाहरिष्यंत्स्यात्तंपात्रनिर्णेजनेनाभिव्युक्षेदेवंतथैवसंमृज्याद्यथाग्निनाभिव्युक्षेत्साऽइवैवोल्क्
म्य॥१०॥तद्धैके।स्रुक्संमार्जनान्यग्नावभ्यादधतिव्वेदस्याहाभ्रंवंस्रुचऽएभिःसममार्जिषुरिदंवैकिंचिद्य शिवः
ज्ञस्यनेदिदंबहिर्द्धायज्ञादभवदितितदुतथानकुर्याद्यथायस्माऽशनमाहरेत्तंपात्रनिर्णेजनेपाय ॥२८॥

६

येदेवं तं तस्मादुपरास्येदेवैतानि॥११॥ अथ पत्नीं सन्नह्यति जघनार्द्धो वा एष यज्ञस्य यत्पत्नी प्राञ्चं यज्ञं तायमा
नो यादिति युनक्त्येवैनामेतद्युक्ता मे यज्ञमन्वासाता इति॥१२॥ योक्त्रेण सन्नह्यति योक्त्रेण हि योग्यं युञ्जन्त्यस्ति
वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्रेणान्तर्द्धा
त्यथ मेध्येनैवोत्तरार्द्धेनाज्यमवेक्षते तस्मात्पत्नीं सन्नह्यति॥१३॥ स वा अभिवासः सन्नह्यति। ओषधयो वै
वासो वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्द्धाति तथो हैनामेषा वरुण्या रज्जुर्न हिनस्ति तस्मादभिवासः सन्न स: ४
ह्यति॥१४॥ स सन्नह्यति। अदित्यै रास्नासीतीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वा एतस्य पत्नी भवति
तदस्या एतद्रास्नामेव करोति न रज्जुं हिरो वै रास्ना तामेवास्या एतत्करोति॥१५॥ स वै न ग्रन्थिं कुर्याद्
वरुण्यो वै ग्रन्थिर्वरुणो ह पत्नीं गृह्णीयाद्यद्ग्रन्थिं कुर्यात्तस्मान्न ग्रन्थिं करोति॥१६॥ ऊर्द्ध्वमेवोद्गूहति। वि
ष्णोर्वेष्पोसीति सा वै न पश्चात्प्राचीयज्ञमन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात्प्राची

29

देवानांयज्ञमन्वास्तेतद्धेमामभ्यारोहेत्सापत्नीह्निप्रेमुंल्लोकमियात्तथोहपत्नीज्योग्जीवतितुदस्याऽएवैतन्निह्नु
तेतथोहेनामियन्नहिनस्तितस्मादुदङ्ङ्हिलतुऽइवैवान्वासीत॥१७॥ अथाज्यमवेक्षते। योषावैपत्नीरेतऽआज्यं
मिथुनमेवैतत्प्रजननंक्रियतेतस्मादाज्यमवेक्षते॥१८॥ सावेक्षते। अदब्धेनत्वाचक्षुषावपश्यामीत्यनार्त्तेनत्वा
चक्षुषावपश्यामीत्येवैतदाहाग्नेर्जिह्वासीतियदावाऽएतदग्नौजुह्वत्य[illegible]ग्नेर्जिह्वाऽइवोत्तिष्ठंतितस्मादाहा
ग्नेर्जिह्वासीतिसुहूर्द्देवेभ्यऽइतिसाधुदेवेभ्यऽइत्येवैतदाहधाम्नेधाम्नेमेभवयजुषेयजुषऽइतिसर्वस्मै
मेयज्ञायेधीत्येवैतदाह॥१९॥ अथाज्यमादायप्राङुदाद्रवति। तदाहवनीयेधिश्रयतियस्याहवनीयेहवीं
षिश्रपयंतिसर्वेमिवज्ञऽआहवनीयेशृतोसदित्यथयदमुत्राग्रेधिश्रयतिपत्नींछ्तवकाशयिष्यन्भवति
नहितदवकल्प्यतेयत्सामिप्रत्यग्घरेत्पत्नीमवकाशयिष्यामीत्यथयत्सत्नीन्नावकाशयेदंतरियाद्धयज्ञात्प
त्नींतथोहयज्ञात्पत्नींनांतरेतितस्माद्धस्मार्द्धमेवविलाप्यप्रागुदाहरत्यवकाश्यपत्नींयस्योपत्नीन

ज्यंग्रह्णात्यन्तारमेवैतत्परिमितवत्तरं कनीयांसं कुर्वंत्यस्मिन्वीर्यं बलं दधात्यथ यदंशौ गृह्णंस्तदुपभृति गृह्णान्क
नीयऽआज्यं गृह्णात्याद्यमेवैतदपरिमिततरं भूयांसं कुर्वंत्यस्मिन्वीर्यमबलीयांसं करोति तस्मादुत राजा
पारां विशं ज्यावसायायेकवेश्मनैव जिनानि त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो हतद्वीर्येण यज्जुह्वां
भूयऽआज्यं गृह्णाति सयज्जुह्वां गृह्णाति जुह्वै वतज्जुहोति यदुपभृति गृह्णाति जुह्वै वतज्जुहोति
॥१४॥ न दाहुः। कस्माऽउ तत्स्रुवुपभृति गृह्णीयाद्यदुपभृतान्न जुहोतीति सयद्धोपभृता जुहुयात्पृथ
ग्घैवेमाः प्रजाः स्युर्नैवात्ता स्यान्नाद्यः स्यादथ यत्तज्जुह्वै वसमानीय जुहोति तस्मादिमा विशः
क्षत्रियाय बलिं हरंत्यथ यदुपभृति गृह्णाति तस्मादु क्षत्रियस्यैव वशे सति वैश्यं पशावऽउप
तिष्ठन्ते यय तज्जुह्वैवसमानीय जुहोति तस्माद्यदा तत्क्षत्रियः कामयते थाह वैश्य मपियत्ते परो
निहितं तदाहरेति तं जिनाति त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो हतद्वीर्येण॥१५॥ तानि

वाऽएतानि। छंदोभ्यऽआज्यानि गृह्णंते स यच्चतुर्जुह्वां गृह्णाति गायत्र्यै तद्गृह्णात्यथ यदष्टौ कृत्वऽउ
पभृति गृह्णाति त्रिष्टुब्जगतीभ्यां तद्गृह्णात्यथ यच्चतुर्ध्रुवायां गृह्णात्यनुष्टुभे तद्गृह्णाति वाग्वाऽअ
नुष्टुब्वाचो वाऽइदं सर्वं प्रभवति तस्माद्ध्रुवायाऽएव सर्वो यज्ञः प्रभवतीयं वाऽअनुष्टुबस्यै वाऽइ
दं सर्वं प्रभवति तस्माद्ध्रुवायाऽएव सर्वो यज्ञः प्रभवति॥१६॥ स गृह्णाति। धामनामासि प्रियं
देवानामित्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धामनामासि प्रियं देवानामित्यनाधृ
ष्टं देवयजनमसीति वज्रो ह्याज्यं तस्मादाहानाधृष्टं देवयजनमसीति॥१७॥ स वाऽएतेन यजुषा
सकृज्जुह्वां गृह्णाति। त्रिस्तूष्णीमेतेनैव यजुषा सकृदुपभृति गृह्णाति सप्तकृत्वस्तूष्णीमेतेनैव
यजुषा सकृद्ध्रुवायां गृह्णाति। त्रिस्तूष्णीं तदाहुस्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञऽइति
तदु न तथा कुर्यात्सद्व देवात्रोऽथ्य वत्रिर्गृहीतं संपद्यते॥१८॥ ब्राह्मणं॥५॥ प्रोक्षणीरध्वर्युरादत्ते। सः शिव
॥३२॥